प्रभवत् यहरा गमे १९

परस् तस् मात्तु भावो$न्यो$ व्यक्तो$व्यक्तात् सना तनः

यस् स सर् वेषु भूतेषु

नश् यत् सुन विनश् यति २०

अव् यक् तो$ क्षर इत् युक्तः

तमाहु# परमाङ् गतिम्

यम् प्राप् यन निवर् तन्ते

तद् धाम परमम् मम २१

पुरुषस् सपर# पार् थ

भक् त्या लभ्यस् त्वनन् यया

यस् यान्तस् थानि भूतानि

येन सर् वमिदन् ततम् २२

यत्र काले त्वना वृत् तिम्

आवृत् तिञ् चैव योगिनः

प्रयाता यान् तितङ् कालम्

वक् ष्यामि भरतर् षभ २३

अग् निर् ज्योति रहश् शुक् लः

षण् मासा उत्त रायणम्

तत्रप् रयाता गच्छन् ति (!!)

ब्रह्मब् रह्म विदो जनाः २४

धूमो रात्रिस् तथा कृष्णः

षण् मासा दक् षिणा यनम्

तत्र चान्द्र मसञ् ज्योतिः

योगीप् राप्य निवर् तते २५

शुक् ल कृष् णे गतीह् येते

जगतश् शाश् वते मते

एकया यात् यना वृत् तिम्

अन् यया वर् तते पुनः २६

नैते सृती पार् थ जानन् (!!)

योगी मुह् यति कश्चन

तस् मात् सर् वेषु कालेषु

योग युक् तो भवार् जुन २७

*(iiii)

वेदेषु यज्ञेषु तपस् सुचैव

दानेषु यत् पुण् य फलम् प्रदिष् टम्

अत् येति तत् सर् वमिदँव् विदित् वा

योगी परं स्थान मुपैति चाद् यम् २८

ॐ तद् सदिति श्री मद् भगवद् गीतासु,उपनि षत्सु, ब्रह्म विद्या याम्, योग शास्त्रे, श्रीकृष्णार्जुन सँव्वादे, अक् षरब् रह्म योगो नाम, अष्ट मोऽध्याय:

## 9th adhyaya

ॐ श्री परमात् मने नम:

अथ नवमोऽ ध्याय:

राज विद्या राज गुह्य योग:

श्री उ

इदन् तु ते गुह्य तमम्

प्रवक् ष्याम् यन सूयवे

ज्ञानँव् विज्ञान सहितम्

यज् ज्ञात्वा मोक् ष्यसेऽ शुभात् १

राज विद्या राज गुह्यम् (!!)

पवित्र मिदमुत् तमम्

प्रत् यक्षाव गमन् धर्म्यम्

सुसु खङ् कर्तु मव्ययम् २

अश्रद् दधाना# पुरुषाः (!!)

धर्मस् यास्य परन् तप

अप् राप्य मान् निवर् तन्ते

मृत्यु संसार वर्त् मनि ३

मया तत मिदं सर्वम्

जगदव् यक्त मूर् तिना

मत् स्थानि सर्व भूतानि

न चाहन् तेष्व वस्थितः ४

न च मत् स्थानि भूतानि

पश्य मे योग मैश्वरम्

भूतभृन् न च भूतस्थः

ममात् मा भूत भावनः ५

यथा काशस् थितो नित्यम्

वायुस् सर्वत् रगो महान्

तथा सर्वाणि भूतानि

मत् स्थानीत् युपधा रय ६

सर्व भूतानि कौन्तेय

प्रकृतिँय् यान्ति मामिकाम्

कल्पक् षये पुनस् तानि

कल्पा दौविसृ जाम्यहम् ७

प्रकृतिं स्वा मवष् टभ्य

विसृजा मिपुन# पुनः

भूतग् राम मिमङ् कृत् स्नम्

अवशम् प्रकृतेर् वशात् ८

न च मान् तानि कर्माणि

निबध् नन्ति धनञ् जय

उदा सीन वदासी नम्

असक् तन् तेषु कर्मसु ९

मयाध् यक्षेण प्रकृतिः

सूयते सचरा चरम्

हेतु नानेन कौन्तेय

जगद् विपरि वर्तते १०

अव जानन्ति माम् मूढाः

मानुषीन् तनु माश्रितम्

परम् भाव मजा नन्तः

मम भूत महेश् वरम् ११

मोघा शामो घकर्मा णः

मोघज्ञा नावि चेतसः

राक्षसी मासु रीञ् चैव

प्रकृ तिम् मोहि नीं श्रिताः १२

महात् मानस् तु माम् पार्थ

दैवीम् प्रकृति माश्रिताः

भजन् त्यनन्य मनसः

ज्ञात् वाभू ताधि मव्ययम् १३

सततङ् कीर्त यन्तो माम्

यतन् तश्च दृढव् रताः

नमस् यन्तश् च माम् भक् त्या

नित्य युक्ता उपा सते १४

ज्ञान यज्ञेन चाप्यन् ये

यजन्तो मामु पासते

एकत्वे नपृथक् त्वेन

बहुधा विश्व तोमु खम् १५

अहङ् क्रतु रहँय् यज्ञः

स्वधा हम हमौ षधम्

मन्त्रो ऽहम हमेवा ज्यम्

अह मग्निर हं हुतम् १६

पिता हमस्य जगतः

माता धाता पिता महः

वेद्यम् पवित्र मोङ् कारः

ऋक् साम यजुरे वच १७

गतिर् भर्ताप् रभुस् साक्षी

निवासश् शरणं सुहृत्

प्र भव#प्र लयस् स्थानम्

निधानम् बीज मव्ययम् १८

तपाम् यह महँव् वर्षम्

नि गृह्णाम् युत्सृजा मिच

अमृतञ् चैव मृत्युश् च

सदसच् चाहमर् जुन १९

*(s s I I )

त्रैविद्या मां सोम पा# पूत पापाः

यज्ञै रिष्ट्वा स्वर् गतिम् प्रार् थयन्ते

ते पुण्य मासाद्य सुरेन् द्रलोकम्

अश् नन्ति दिव्यान् दिवि देव भोगान् २०

*(s s I u)

ते तम् भुक् त्वा स्वर्ग लोकँव् विशालम्

क्षीणे पुण्येमर् त्यलोकँव् विशन्ति

एवन् त्रयी धर्म मनुप्र पन्नाः

गता गतङ् काम कामा लभन्ते २१(!!)

अनन् याश् चिन्त यन्तो माम्

ये जना# पर्यु पासते

तेषान् नित्या भियुक् तानाम्

योगक् षेमँव् वहाम् यहम् २२

येऽप्यन् यदेवता भक्ताः

यजन्ते श्रद् धयान् विताः

तेऽपि मामेव कौन्तेय

यजन् त्यविधि पूर्वकम् २३

अहं हि सर्व यज्ञानाम्

भोक्ता चप्र भुरेव च

न तु मामभि जानन्ति

तत् त्वेनातश् च्यवन्ति ते २४

यान्ति देवव्र तादेवान्

पितॄ न्यान्ति पितृव् रताः

भूतानि यान्ति भूतेज्याः

यान्ति मद् याजिनोऽ पिमाम् २५

पत्रम् पुष्पम् फलन् तोयम्

यो मे भक् त्या प्रयच् छति

तद हम् भक् त्युप हृतम् (!!)

अश्ना मिप्रय तात् मनः २६

यत् करोषि यदश् नासि

यज् जुहोषि ददासि यत्

यत् तपस् यसि कौन्तेय

तत् कुरुष्व मदर् पणम् २७

शुभा शुभ फलै रेवम्

मोक्ष्यसे कर्म बन्धनैः

सन् न्यास योग युक् तात् मा

विमुक् तोमा मुपैष् यसि २८

समोऽहं सर्व भूतेषु

न मेद् वेष्योऽस्ति नप्रि यः

ये भजन्ति तु माम् भक् त्या

मयि ते तेषु चाप् यहम् २९

अपि चेत् सुदुरा चारः

भजते माम नन्य भाक्

साधु रेव स मन्तव्यः

सम्यग् व्यव सितो हिसः ३०

क्षिप्रम् भवति धर्मात् मा

शश्वच् छान्तिन् निगच् छति

कौन्ते यप्रति जानीहि

न मे भक्त# प्र णश्यति ३१

मां हि पार्थव्य पाश्रित्य

येऽपिस् यु# पाप योनयः

स्त्रियो वैश्यास् तथा शूद्राः

तेऽपि यान्ति पराङ् गतिम् ३२

किम् पुनर् ब्राह्मणा# पुण्याः

भक्ता राजर् षयस् तथा

अनित्य मसुखँल् लोकम्

इमम् प्राप्य भजस्व माम् ३३

मन् मना भव मद् भक्तः

मद् याजी मान् नमस् कुरु

मामे वैष्यसि युक् त्वैवम्

आत्मानम् मत् परा यणः ३४

ॐ तत् सदिति, श्रीमद् भगवद् गीतासु, उपनि षत्सु,ब्रह्म विद्यायाम्,योग शास्त्रे,श्रीकृष्णार् जुन सँव् वादे, राज विद्या राज गुह्य योगो नाम, नव मोऽध्याय:

# 10th adhyaya

ॐ श्री परमात् मने नम:

अथ दशमोऽ ध्याय:

विभूति योग:

श्री उ

भूय एव महा बाहो

शृणु मे परमँव् वच:

यत्तेऽहम् प्रीयमा णाय

वक्ष्या मि हित काम्य या १

न मे विदुस् सुर गणा: (!!)

प्रभवन् न महर् षय:

अह मादिर् हि देवानाम्

महर्षी णाञ् च सर्व श: २

यो माम जमनादिञ् च

वेत् तिलोक महेश् वरम्

असम् मूढस् स मर्त् येषु

सर्व पापै# प्रमुच् यते ३

बुद् धिर् ज्ञान म सम्मो हः

क्षमा सत्यन् दमश् शमः

सुखन् दुःखम् भवोऽभा वः

भयञ् चाभय मेव च ४

अहिंसा समता तुष्टिः

तपो दानँय् यशो ऽयशः

भवन् ति भावा भूतानाम्

मत् त एव पृथग् विधाः ५

महर् षयस् सप्त पूर्वे

चत्वा रो मनवस् तथा

मद् भावा मानसा जाताः

येषाँल् लोक इमा# प्रजाः ६

एताँव् विभूतियँ योगञ् च (!!)

मम यो वेत्ति तत् त्वतः

सो ऽवि कम्पेन योगेन

युज् यते नात्र संशयः ७

अहं सर्वस्यप् रभवः (!!)

मत् तस् सर्वम् प्र वर्तते

इति मत्वा भजन् ते माम्

बुधा भाव समन् विताः ८

मच् चित्ता मद् गतप् राणाः

बोध यन्त# परस् परम्

कथ यन्तश् च मान् नित्यम्

तुष् यन्ति च रमन्ति च (!!) ९

तेषां सतत युक् तानाम्

भज ताम् प्रीति पूर्व कम्

ददामि बुद् धियोगन् तम्

येन मा मुप यान्ति ते १०

तेषा मेवानु कम् पार्थम्

अह मज्ञा न जन् तमः

नाश याम् यात् म भावस् थः

ज्ञा नदीपे न भास्वता ११

अ उ

परम् ब्रह्म परन् धाम

पवित्रम् परमम् भवान्

पुरुषं शाश् वतन् दिव्यम्

आदि देव मजँव् विभुम् १२

आहुस् त्वा मृषयस् सर्वे

देवर् षिर् नारदस् तथा

असितो देवलो व्यासः

स्वयञ् चैवब् रवीषि मे १३

सर्व मेत दृतम् मन्ये

यन् माँव् वदसि केशव

न हि ते भगवन् व्यक् तिम्

विदुर् देवा न दान वाः १४

स्वय मेवात् मनात् मानम्

वेत् थत् वम् पुरुषो त्तम

भूत भाव न भूतेश

देव देव जगत् पते १५

वक् तुमर् हस्य शेषेण

दिव्या ह्यात् मवि भूतयः

याभिर् विभूति भिर् लोकान्

इमांस् त्वँव् व्याप्य तिष्ठसि १६

कथँव् विद्या महँय् योगिन्

त्वां सदा परि चिन्त यन्

केषु केषु च भावेषु

चिन् त्योऽ सि भग वन् मया १७

विस् तरेणात् मनो योगम्

विभूतिञ् चज नार् दन

भूय% कथय तृप् तिर् हि

शृण् वतो नास्ति मेऽ मृतम् १८

श्री उ

हन्त ते कथ यिष् यामि

दिव्या ह्यात्म विभूतयः

प्राधान् यत% कुरुश् रेष्ठ

नास् त्यन्तो विस् तरस्य मे १९

अह मात् मा गुडा केश

सर्व भूता शयस् थितः

अह मादिश् च मध्यञ् च

भूता नामन्त एव च २०

आदित्या नामहँव् विष्णुः

ज्यो तिषां रवि रंशु मान्

मरीचिर् मरु तामस् मि

नक्षत्रा णामहं शशी २१

वेदा नांसाम वेदोऽ स्मि

देवा नामस् मि वासवः

इन्द्रिया णाम् मनश् चास् मि

भूता नामस् मि चेतना २२

रुद्राणां शङ् करश् चास् मि

वित्तेशो यक्ष रक्ष साम्

वसू नाम् पावकश् चास् मि

मेरुश् शिख रिणाम हम् २३

पुरो धसाञ् च मुख् यम् माम्

विद् धि पार्थ बृहस् पतिम्

से नानी नामहं स्कन्दः

सर सामस् मि सा गरः २४

महर् षीणाम् भृगु रहम् (!!)

गिरा मस् म्येक मक्षरम्

यज्ञानाञ् जप यज्ञोऽ स्मि

स्था वरा णां हिमा लयः २५

अश् वत् थस् सर्व वृक्षा णाम्

देवर् षीणाञ् च नारदः

गन् धर् वाणाञ् चित्र रथः (!!)

सिद् धानाङ् कपिलो मुनिः २६

उच् चैश् श्रव समश् वानाम्

विद् धि माम मृतोद् भवम्

ऐराव तङ् गजेन् द्राणाम्

नराणाञ् च न राधिपम् २७

आयु धाना महँव् वज् रम्

धेनू नामस् मि काम धुक्

प्रजनश् चास्मि कन् दर्पः

सर्पा णामस् मि वासुकिः २८

अनन् तश् चास्मि नागा नाम्

वरुणो याद सामहम्

पितृ णा मर्यमा चास्मि

यमस् सयँ्यम तामहम् २९

प्रह् लादश् चास्मि दैत्या नाम्

काल% कलय तामहम्

मृगा णाञ् च मृगेन् द्रोऽ हम्

वैन तेयश् च पक्षिणाम् ३०

पवन# पवता मस्मि

रामश् शस्त्र भृता महम्

झषाणाम् मकरश् चास्मि

स्रो तसा मस्मि जाह्नवी ३१

सर्गा णामादि रन् तश्च

मध्यञ् चैवा हमर् जुन

अध्यात् म विद्या विद्यानाम् (!!)

वाद# प्र वदता महम् ३२

अक्षरा णामका रोऽस्मि

द्वन् द्वस् सामा सिकस्य च

अह मेवाक्ष य%कालः

धाताहँव् विश् वतो मुखः ३३

मृत्युस् सर्व हरश् चाहम्

उद् भवश् च भविष् यताम्

कीर् तिश् श्रीर् वाक् च नारीणाम्

स्मृतिर् मेधा धृति:(हि) क् षमा ३४

बृहत् साम तथा साम् नाम्

गायत्री छन्द सामहम्

मासा नाम् मार्ग शीर् षोऽहम्

ऋतूनाङ् कुसु माकरः ३५

द्यूतञ् छल यतामस् मि

तेजस् तेजस् विनाम हम्

जयोऽ स्मिव् यव सायोऽ स्मि

सत् त्वं सत् त्वव तामहम् ३६

वृष् णीनाँव् वासु देवोऽस्मि

पाण् डवा नान् धनञ् जयः

मुनी नामप् यहँव् व्यासः

कवी नामुश ना कविः ३७

दण् डो दमय तामस् मि

नीति रस्मि जिगी षताम्

मौनञ् चैवास् मि गुह् यानाम्

ज्ञानञ् ज्ञान वता महम् ३८

यच् चापि सर्व भूतानाम्

बीजन् तदह मर्जुन

न तदस् तिवि ना यत् स्यात्

मया भूतञ् चरा चरम् ३९

नान् तोऽ स्ति मम दिव् यानाम्

विभूती नाम् परन् तप

एष तूद् देश त# प्रोक्तः

विभू तेर् विस् तरो मया ४०

यद् यद् विभूति मत् सत् त्वम्

श्रीमदूर् जित मेव वा

तत् तदेवा वगच्छत् वम्

मम तेजों ऽ शसम् भवम् ४१

अथ वा बहु नै तेन

किञ् ज्ञा तेन तवार् जुन

विष् टभ्या हमिदङ् कृत् स्नम्

एकां शेनस् थितो जगत् ४२

ॐ तत् सदिति, श्रीमद् भगवद् गीतासु, उपनि षत्सु,ब्रह्म विद्यायाम्,योग शास्त्रे,श्रीकृष्णार् जुन सँव् वादे, विभूति योगो नाम, दशमो ऽ ध्याय:

## 11th adhyaya

ॐ श्री परमात् मने नम:

अथ एका दशोऽ ध्याय:

विश्व रूप दर्शन योग:

अ उ

मदनुग् रहाय परमम् (!!)

गुह्य मध्यात्म सञ् ज्ञितम्

यत् त्वयोक् तँव् वचस् तेन

मोहोऽयँव् विगतो मम १

भवाप् ययौ हि भूतानाम्

श्रुतौ विस् तर शो मया

त्वत् त% कम ल पत्राक्ष

माहात् म्यमपि चाव्ययम् २

एवमे तद्यथात् थत्वम्

आत्मा नम्पर मेश्वर

द्रष्टु मिच्छामि ते रूपम्

ऐश्वरम् पुरुषोत् तम ३

मन्य से यदि तच् छक्यम्

मया द्रष्टु मितिप्र भो

योगेश् वर ततो मे त्वम्

दर्श यात् मान मव्य यम् ४

श्री उ

पश्य मे पार्थ रूपाणि

शतशो sथ सहस्र शः

नाना विधानि दिव् यानि

नाना वर्णा कृतीनि च ५

पश्या दित्यान् वसून् रुद्रान्

अश्वि नौ मरुतस् तथा

बहून् यदृष्ट पूर्वाणि

पश्याश् चर्याणि भारत. ६

इहैकस् थञ् जगत् कृत् स्नम्

पश्याद् यस चरा चरम्

मम देहे गुडा केश

यच्चान् यद् द्रष्टु मिच्छसि ७

न तु मां शक्यसे द्रष्टुम्

अने नैवस् वचक्षु षा

दिव्यन् ददामि ते चक्षुः

पश्य मे योग मैश्वरम् ८

स उ

एवमुक् त्वा ततो राजन्

महा योगेश् वरो हरिः

दर्श यामास पार्थाय

परमं रूप मैश्वरम् ९

अनेक वक् त्र नयनम् (!!)

अनेकाद् भुत दर्श नम्

अनेक दिव्या भरणम् (!!)

दिव्या नेकोद् यता युधम् १०

दिव्य माल्याम् बर धरम् (!!)

दिव्य गन्धानु लेपनम्

सर्वाश् चर्य मयन् देवम्

अनन्तँव् विश्वतो मुखम् ११

दिवि सूर्य सहस्रस् य

भवेद् युगप दुत्थिता

यदि भास् सदृशी सा स्यात्

भासस् तस्य महात् मनः १२

तत्रै कस्थञ् जगत् कृत्स्नम्

प्र विभक्त मनेक धा

अपश्यद् देव देवस्य

शरीरे पाण्डवस् तदा १३

ततस् स विस् मया विष्टः

हृष्ट रोमा धनञ् जयः

प्रणम्य शिरसा देवम्

कृताञ् जलिर भाषत १४

अ उ

*(U I I u )

पश्यामि देवांस् तव देव देहे

सर्वांस् तथा भूत विशेष सङ्गघान्

ब्रह्माण मीशङ् कमला सनस् थम्

ऋषींश् च सर्वा नुर गांश् च दिव्यान् १५

* (U s I I )

अनेक बाहू दर वक् त्र नेत्रम्

पश्या मित्वां सर्व तोऽनन्त रूपम्

नान्तन् न मध्यन् न पुनस् तवादिम्

पश्यामि विश्वे श्वर विश्व रूप १६

* (U s s I)

किरी टिनङ् गदिनञ् चक्रिणञ् च (!!)

ते जो राशिं सर्व तो दीप्ति मन्तम्

पश्या मित्वान् दुर् निरीक्ष्यं समन् तात्

दीप् तान लार्कद् युति मप्र मेयम् १७

* (U u u u )

त्वमक्षरम् परमवँ् वेदि तव्यम् (!!)

त्वमस्य विश्वस्य परन् निधानम्

त्व मव् ययश् शाश्वत धर्म गोप्ता

सना तनस् त्वम् पुरुषो मतो मे १८

* (U u s u)

अनादि मध्यान्त मनन्त वीर्यम्

अनन्त बाहुं शशि सूर्य नेत्रम्

पश्या मित्वान् दीप्त हुताश वक्त्रम् (!!)

स्व तेजसा विश्व मिदन् तपन्तम् १९

* (I I I I )

द्यावा पृथिव् यो रिदमन् तरं हि

व्याप्तन् त्वयै केन दिशश् च सर्वाः

दृष्ट्वाद् भुतं रूप मुग्रन् तवेदम्

लोकत्र यम्प्रव् यथितम् महात् मन् २०

* (U t t t )

अमी हित्वां सुर सङ्घा विशन्ति (!!)

केचिद् भीता# प्राञ्जल यो गृणन्ति (!!)

स्वस्तीत् युक्त्वा महर्षि सिद् ध सङ्घाः (!!)

स्तुवन् तित्वां स्तुति भि# पुष्क लाभिः (!!) २१

* (S u I s)

रुद्रा दित् या वसवो ये च साध्याः (!!)

विश्वेऽश् विनौ मरुतश् चोष् मपाश्च (!!)

गन्धर्व यक्षासु रसिद्ध सङ्घाः

वीक्षन्ते त्वाँव् विस् मिताश् चैव सर्वे २२

* (I t u s)

रूपम् महत्ते बहु वक् त्र नेत्रम्

महा बाहो बहु बाहूरु पादम् (!!)

बहू दरम् बहु दंष्ट्रा करालम् (!!)

दृष्ट्वा लोका# प्रव् यथितास् तथा हम् (!!) २३

* (U I s u)

नभस् स्पृशन् दीप्त मनेक वर्णम्

व्यात् तान नन् दीप्त विशाल नेत्रम्

दृष्ट्वा हित्वाम् प्रव् यथितान् तरात् मा (!!)

धृतिन् न विन्दामि शमञ् च विष्णो २४

* (I I u u )

दंष्ट्रा करा लानि च ते मुखानि

दृष्ट्वैव काला नल सन् निभानि

दिशो न जाने न लभे च शर्म

प्रसीद देवेश जगन् निवास २५

* (U I s u)

अमी चत्वान् धृत राष्ट्रस्य पुत्राः (!!)

सर्वे सहै वाव निपाल सङ्घैः

भीष्मो द्रोणस् सूत पुत्रस् तथा सौ

सहास् मदीयै रपि योध मुख्यैः २६

* (I I I s)

वक्त्राणि ते त्वर माणा विशन्ति (!!)

दंष्ट्रा करा लानि भया नकानि

केचिद् विलग्ना दशनान् तरेषु

सन्दृश् यन्ते चूर्णि तैरुत्त माङ्गैः २७

* (U u u u)

यथा नदीनाम् बहवो ऽम् बु वेगाः

समुद्र मेवाभि मुखा द्र वन्ति

तथा तवामी नर लोक वीराः

विशन्ति वक्त्राण् यभि विज् वलन्ति २८

* (U u u u)

यथा प्रदीप् तञ् ज्वलनम् पतङ्गाः

विशन्ति नाशाय समृद् धवेगाः

तथैव नाशाय विशन्ति लोकाः

तवापि वक्त्राणि समृद् धवेगाः २९

* (I I I I )

लेलिह् यसे ग्रस मानस् समन्तात् (!!)

लोकान् समग्रान् वदनैर् ज्वलद् भिः

तेजो भिरापूर् यजगत् समग्रम्

भासस् तवोग्रा# प्र तपन्ति विष्णो ३०

* (I u I u )

आख्या हि मे को भवा नुग् ररूपः

नमोऽस्तु ते देव वरप्र सीद

विज्ञातु मिच्छामि भवन्त माद्यम्

न हिप् रजा नामि तवप् रवृत्तिम् ३१

* (I I s I )

श्री उ

कालो ऽ स्मि लोकक्ष यकृत् प्रवृद्धः

लोकान् समा हर्तु मिहप् रवृत्तः

ऋतेऽपि त्वान् न भविष् यन्ति सर्वे (!!)

ये ऽ वस् थिता# प्रत्य नीकेषु योधाः ३२ (!!)

* (U s u u)

तस्मात् त्वमुत् तिष्ठ यशो लभस्व

जित्वा शत्रून् भुङ्क्ष्व राज्यं समृद् धम्

मयै वैते निहता# पूर्व मेव (!!)

निमित्त मात्रम् भव सव्य साचिन् ३३

* (I I u I )

द्रोणञ् च भीष्मञ् चज यद्रथञ् च

कर्णन् तथान् यानपि योध वीरान्

मया हतांस् त्वञ् जहि मा व्यथिष्ठाः

युध्यस्व जेतासि रणे सपत् नान् ३४

स उ

* (S u u u )

एतच्छ् रुत्वा वचनङ् केशवस्य (!!)

कृताञ् जलिर् वेप मान% किरीटी

नमस् कृत्वा भूय एवाह कृष्णम् (!!)

सगद् गदम् भीत भीत# प्रणम्य ३५

अ उ

* (I u I I )

स्थाने हृषी केश तवप् रकीर्त्या

जगत् प्रहृष्यत् यनु रज्यते च

रक्षांसि भीतानि दिशो द्रवन्ति

सर्वे नमस् यन्ति च सिद्ध सङ्घाः ३६

* (I u u u)

कस्माच् चते न नमेरन् महात्मन् (!!)

गरीयसे ब्रह्म णोऽ प्यादि कर्त्रे

अनन्त देवेश जगन् निवास

त्वमक्ष रं सदसत् तत् परयँ यत् ३७(!!)

* (U u I u)

त्वमा दिदेव# पुरुष# पुराणः

त्वमस्य विश्वस्य परन् निधानम्

वेत्ता सि वेद्यञ् च परञ् च धाम

त्वया ततँव् विश् वम नन्त रूप ३८

* (I u u u )

वायुर् यमोऽ ग्निर् वरुणश् शशाङ्कः

प्रजा पतिस् त्वम् प्रपि तामहश् च

नमो नमस्तेऽस्तु सहस्र कृत्वः

पुनश्च भूयोऽ पि नमो नमस्ते ३९

* (U u u I)

नम# पुरस् तादथ पृष्ठ तस्ते

नमो ऽ स्तु ते सर्व त एव सर्व

अनन्त वीर्या मित विक्रमस् त्वम्

सर्वं समाप् नोषि ततोऽ सि सर्वः ४०

* (U I u u )

सखेति मत्वा प्रसभँय् यदुक् तम्

हे कृष्ण हे यादव हे सखेति

अजा नता महि मानन् तवेदम् (!!)

मया प्रमा दात् प्रणयेन वापि ४१

* (I u I i)

यच् चाव हासार्थ मसत् कृतोऽसि

विहार शय्या सन भोजनेषु

एको ऽ थवाप् यच् युत तत् समक्षम्

तत् क्षामये त्वा मह मप् रमेयम् ४२

* (U u I I)

पितासि लोकस्य चरा चरस्य

त्वमस्य पूज्यश्च गुरुर् गरीयान्

नत् वत् समो ऽस्त्यभ् यधिक%कुतोऽ न्यः

लोकत्र येऽप्यप् रति मप् रभाव ४३

* (I u u u )

तस्मात् प्रणम् यप्रणि धाय कायम्

प्रसाद येत्वा मह मीश मीड्यम्

पितेव पुत्रस्य सखेव सख्युः

प्रिय# प्रिया यार्हसि देव सोढुम् ४४

* (U u u u )

अदृष्ट पूर्वं हृषितो ऽ स्मि दृष्ट्वा

भयेन चप्रव् यथितम् मनो मे

तदेव मे दर्शय देव रूपम्

प्रसीद देवेश जगन् निवास ४५

* (U s I u )

किरी टिनङ् गदिनञ् चक्र हस्तम् (!!)

इच्छामित् वान् द्रष्टु महन् तथैव (!!)

तेनैव रूपेण चतुर् भुजेन

सहस्र बाहो भव विश्व मूर्ते ४६

श्री उ

* (U I I I )

मयाप् रसन् ने न तवार् जुनेदम्

रूपम् परन् दर्शित मात् म योगात्

तेजो मयँव् विश्व मनन्त माद्यम्

यन् मे त्वदन् येन न दृष्ट पूर्वम् ४७

* ( u u s I )

न वेद यज्ञाध् ययनैर् न दानैः

न चक्रिया भिर् न तपोऽ भिरुग् रैः

एवं रूपश् शक्य अहन् नृलोके(!!)

द्रष्टुन् त्व दन्येन कुरुप् रवीर ४८

* (I s u u )

मा ते व्यथा माच विमूढ भावः

दृष्ट्वा रूपङ् घोर मीदृङ् ममेदम्

व्यपेत भी# प्रीत मना# पुनस् त्वम्

तदेव मे रूप मिदम् प्र पश्य ४९

स उ

* (I u I I )

इत्यर् जुनँव् वासु देवस् तथोक् त्वा (!!)

स्वकं रूपन् दर्श यामास भूयः (!!)

आश्वास यामास च भीत मेनम्

भूत्वा पुनस् सौम्य वपुर् महात् मा ५०

अ उ

दृष्ट्वे दम् मानुषं रूपम्

तव सौम्यञ् जनार् दन

इदानी मस्मि सँव् वृत्तः

सचेता# प्रकृतिङ् गतः ५१

श्री उ

सु दुर् दर्श मिदं रूपम्

दृष्ट वानसि यन् मम

देवा अप्यस्य रूपस्य

नित्यन् दर्शन काङ्क्षि णः ५२

नाहँव् वेदैर् न तपसा (!!)

नदा नेन नचेज् यया

शक्य एवँव् विधो द्रष्टुम्

दृष्ट वानसि माँय् यथा ५३

भक्त्या त्वनन् यया शक्यः

अह मेवँव् विधोऽर् जुन

ज्ञातुन् द्रष्टुञ् च तत् त्वेन

प्रवेष्टुञ् च परन् तप ५४

मत् कर्म कृन् मत् परमः (!!)

मद् भक्तस् सङ्ग वर्जितः

निर् वैरस् सर्व भूतेषु

यस् स मामेति पाण्डव ५५

ॐ तत् सदिति, श्रीमद् भगवद् गीतासु, उपनि षत्सु,ब्रह्म विद्यायाम्,योग शास्त्रे,श्रीकृष्णार् जुन सँव् वादे, विश्व रूप दर्शन योगो नाम, एका दशो ऽ ध्यायः

# 12th adhyaya

ॐ श्री परमात् मने नमः

अथद् वादशोऽ ध्यायः

भक्ति योगः

अ उ

एवं सतत युक्ता ये

भक् तास् त्वाम् पर्यु पासते

ये चाप् यक्षर मव् यक्तम्

तेषाङ् के योग वित्तमाः १

श्री उ

मय्या वेश्य मनो ये माम्

नित्य युक्ता उपास ते

श्रद् धया परयो पेताः

ते मे युक् ततमा मताः २

येत् वक्षर मनिर् देश्यम्

अव् यक्तम् पर्युपा सते

सर्वत्र गम चिन्त्यञ् च

कूटस् थमच लन् ध्रुवम् ३

सन् नियम्येन् द्रियग् रामम्

सर् वत्र सम बुद्धयः

तेप् राप् नुवन्ति मामेव

सर्व भूत हिते रताः ४

क्लेशोऽधि कत रस् तेषाम्

अव्यक्ता सक्त चेतसाम्

अव्यक्ता हि गतिर् दुःखम्

देहवद् भिरवाप् यते ५

ये तु सर्वाणि कर्माणि

मयि सन् न्यस्य मत्पराः

अनन् येनैव योगेन

मान् ध्यायन्त उपा सते ६

तेषा महं समुद् धर्ता

मृत्यु संसार सागरात्

भवामि न चिरात् पार्थ

मय्या वेशित चेतसाम् ७

मय्येव मन आ धत्स्व

मयि बुद्धिन् निवेशय

निव सिष्यसि मय्येव

अत ऊर्ध्वन् नसं शयः ८

अथ चित्तं समा धातुम्

न शक्नोषि मयिस् थिरम्

अभ्यास योगेन ततः (!!)

मामिच् छाप्तुन् धनञ्ज य ९

अभ्या सेऽप्य स मर्थोऽसि

मत् कर्म परमो भव

मदर् थमपि कर्माणि

कुर्वन् सिद्धिम वाप्स्यसि १०

अथैत दप्य शक्तोऽसि

कर्तुम् मद् योग माश्रितः

सर्व कर्म फलत् यागम्

तत% कुरु यतात् मवान् ११

श्रेयो हिज्ञान मभ्यासात्

ज्ञानाद् ध्यानँव् विशिष्य ते

ध्यानात् कर्म फलत् यागः

त्यागाच् छान्तिर नन्तरम् १२

अद्वेष्टा सर्व भूतानाम्

मैत्र% करुण एव च

निर्ममो निरहङ् कारः

सम दुःख सुखः(ह) क्षमी १३

सन्तुष् टस्स ततँय् योगी

यतात्मा दृढ निश्चयः

मय्यर् पित मनो बुद्धिः

यो मद् भक्तस् समे प्रियः १४

यस् मान्नोद् विजते लोकः

लोकान् नोद् विजते च यः

हर्षा मर्ष भयोद् वेगैः

मुक्तो यस् सच मेप् रियः १५

अन पेक्षश् शुचिर् दक्षः

उदा सीनो गतव् यथः

सर्वा रम्भ परित्या गी

यो मद् भक् तस् समेप् रियः १६

यो न हृष् यति नद् वेष्टि

न शोचति न काङ् क्षति

शुभाशु भपरित् यागी

भक्ति मान् यस् समेप् रियः १७

समश् शत्रौ च मित्रे च

तथा मानाप मानयोः

शीतोष् णसुख दुःखेषु

समस् सङ्ग वि वर्जितः १८

तुल्य निन्दा स्तुतिर् मौनी

सन्तुष् टो येन केन चित्

अनि केतस् स्थिर मतिः (!!)

भक्ति मान् मे प्रियो नरः १९

ये तु धर्म्या मृतमि दम् (!!)

यथोक् तम् पर्यु पासते

श्रद् दधाना मत् परमाः (!!)

भक्तास् तेऽ तीव मे प्रियाः २०

ॐ तत् सदिति, श्रीमद् भगवद् गीतासु, उपनि षत्सु,ब्रह्म विद्यायाम्,योग शास्त्रे,श्रीकृष्णार् जुन सँव् वादे, भक्ति योगो नाम, द्वादशो ऽ ध्यायः

## 13th adhyaya

ॐ श्री परमात् मने नमः

अथत् रयो दशो ऽध्यायः

क्षेत्रक् षेत्रज्ञ विभाग योगः

श्री उ

इदं शरीरङ् कौन्तेय

क्षेत्र मित्य भिधीय ते

एतद् यो वेत्ति तम् प्राहुः

क्षेत्रज्ञ इति तद् विदः १

क्षेत्रज्ञञ् चापि माँव् विद्धि

सर्वक् षेत्रेषु भारत

क्षेत्रक् क्षेत्रज्ञ योर् ज्ञानम्

यत् तज् ज्ञानम् मतम् मम २

तत् क्षेत्रँय् यच् च यादृक् च

यद्वि कारि यतश् च यत्

सच यो यत् प्रभावश् च

तत् समा सेन मे शृणु ३

ऋषिभिर् बहुधा गीतम्

छन्दो भिर् विविधै# पृथक्

ब्रह्म सूत्र पदैश् चैव

हेतु मद् भिर् विनिश् चितैः ४

महा भूता न्यहङ् कारः

बुद् धिरव् यक्त मेवच

इन्द्रि याणि दशैकञ् च

पञ्च चेन् द्रिय गोचराः ५

इच्छा द्वेषस् सुखन् दुःखम्

सङ्घातश् चेतना धृतिः

एतत् क्षेत्रं समा सेन

सवि कार मुदा हृतम् ६

अमानित् वम दम् भित्वम्

अहिंसा क्षान्ति रार् जवम्

आचार्यो पासनं शौचम्

स्थैर्य मात्म विनिग् रहः ७

इन्द्रियार् थेषु वैराग् यम्

अनहङ् कार एव च

जन्म मृत्यु जरा व्याधि- दुःख दोषानु दर्शनम् ८

असक्ति रनभिष् वङ्गः

पुत्र दार गृहादि षु

नित्यञ् च सम चित्तत् वम्

इष्टा निष्टो प पत्तिषु ९

मयि चा नन्य योगेन

भक्ति रव्यभि चारिणी

विविक्त देश सेवित् वम्

अरतिर् जन संसदि १०

अध्यात् मज्ञान नित्यत् वम्

तत् त्वज्ञानार् थ दर्शनम्

एतज् ज्ञान मितिप् रोक्तम्

अज्ञा नयँ् यद तोऽन्य था ११

ज्ञेययँ् यत् तत् प्रवक् ष्यामि

यज् ज्ञात्वा मृत मश्नुते

अनादि मत् परम् ब्रह्म

न सत् तन् नासदुच् यते १२

सर्व त# पाणि पादन् तत्

सर्वतोऽ क्षिशिरो मुखम्

सर्वतश् श्रुति मल्लोके

सर्व मावृत्य तिष्ठति १३

सर्वेन् द्रिय गुणा भासम्

सर्वेन् द्रिय विवर्जि तम्

असक्तं सर्व भृच् चैव

निर् गुणङ् गुण भोक् तृच १४

बहिरन् तश्च भूतानाम्

अचरञ् चर मेव च

सूक्ष्मत् वात् तद विज्ञेयम्

दूरस् थञ्चान् तिके च तत् १५

अवि भक्तञ् च भूतेषु

विभक्त मिव चस्थितम्

भूत भर् तृच तज् ज्ञेयम्

ग्रसिष्णुप् रभविष् णुच १६

ज्योति षामपि तज् ज्योतिः

तमस# परमुच् यते

ज्ञानञ् ज्ञेयञ् ज्ञान गम्यम् (!!)

हृदि सर्वस्य विष् ठितम् १७

इतिक् षेत्रन् तथा ज्ञानम्

ज्ञेयञ् चोक्तं समा सतः

मद् भक्त एतद् विज्ञाय (!!)

मद् भावा योप पद्यते १८

प्रकृतिम् पुरुषञ् चैव

विद् ध्यनादी उभा वपि

विकारांश् च गुणांश् चैव

विद् धिप् रकृति सम्भवान् १९

कार्य कर णकर्तृत् वे

हेतु# प्रकृति रुच्यते।

पुरुषस् सुख दुःखानाम्

भोक् तृत्वे हेतु रुच्यते २०

पुरुष# प्रकृतिस् थो हि

भुङ् क्ते प्रकृति जान् गुणान्

कारणङ् गुण सङ् गोऽस्य

सद सद्योनि जन्मसु २१

उपद् रष्टा नु मन्ता च

भर्ता भोक्ता महेश् वरः

पर मात् मेति चाप् युक्तः

देहेऽस्मिन् पुरुष# परः २२

य एवँव् वेत्ति पुरुषम् (!!)

प्रकृतिञ् च गुणैस् सह

सर्व था वर्त मानोऽपि

न सभूयोऽ भि जाय ते २३

ध्याने नात् मनि पश्यन्ति

केचि दात् मान मात् मना

अन्ये साङ् ख्येन योगेन

कर्म योगेन चापरे २४

अन्ये त्वेव मजा नन्तः

श्रुत्वान् येभ्य उपा सते

तेऽपि चाति तरन् त्येव

मृत्युं श्रुति परा यणाः २५

यावत् सञ् जायते किञ्चित्

सत् त्वं स्थावर जङ्गमम्

क्षेत्रक् षेत्रज्ञ सयँ् योगात्

तद् विद् धि भरतर् षभ २६

समं सर्वेषु भूतेषु

तिष्ठन् तम् पर मेश्वरम्

विनश् यत् स्ववि नश्यन् तम्

य# पश्यति स पश्यति २७

समम् पश्यन् हि सर्वत्र

सम वस् थित मीश्वरम्

न हिनस् त्यात् मनात् मानम्

ततो याति पराङ् गतिम् २८

प्रकृत् यैव च कर्माणि

क्रिय माणानि सर्वशः

य# पश्यति तथात् मानम्

अकर् तारं स पश्यति २९

यदा भूत पृथग् भावम्

एकस् थमनु पश्यति

तत एव च विस्तारम्

ब्रह्म सम् पद्यते तदा ३०

अनादित् वान् निर् गुणत् वात्

पर मात् माय मव्ययः

शरीरस् थोऽपि कौन्तेय

न करोति न लिप्यते ३१

यथा सर्व गतं सौक्ष् म्यात्

आकाशन् नोप लिप्यते

सर्वत्रावस् थितो देहे

तथात् मा नोप लिप्यते ३२

यथा प्रकाश यत्येकः

कृत् स्नलँ् लोक मिमं रविः

क्षेत्रङ् क्षेत्री तथा कृत् स्नम्

प्रकाश यति भारत ३३

क्षेत्रक् षेत्रज्ञयो रेवम्

अन्त रञ् ज्ञान चक्षुषा

भूतप् रकृति मोक्षञ् च

ये विदुर् यान्ति ते परम् ३४

ॐ तत् सदिति, श्रीमद् भगवद् गीतासु, उपनि षत्सु,ब्रह्म विद्यायाम्,योग शास्त्रे,श्रीकृष्णार् जुन सँव् वादे, क्षेत्रक् षेत्रज्ञ विभाग योगो नाम, त्रयो दशो ऽध्यायः

# 14th adhyaya

ॐ श्री परमात् मने नमः

अथ चतुर् दशोऽ ध्यायः

गुणत् रय विभाग योगः

श्री उ

परम् भूय# प्रवक्ष्यामि

ज्ञानानाञ् ज्ञान मुत्त मम्

यज् ज्ञात् वा मुनयस् सर्वे

परां सिद्धि मितो गताः १

इदञ् ज्ञान मुपा श्रित्य

मम साधर् म्यमा गताः

सर्गेऽपि नोप जायन् ते

प्रलये नव् यथन् तिच २

मम योनिर् महद् ब्रह्म

तस् मिन् गर्भन् दधाम् यहम्

सम् भवस् सर्व भूतानाम्

ततो भवति भारत ३

सर्व योनिषु कौन्तेय

मूर्तयस् सम्भवन् ति याः

तासाम् ब्रह्म महद् योनिः

अहम् बीजप्र द # पिता ४

सत् त्वं रजस् तम इति (!!)

गुणा# प्रकृति सम् भवाः

निबध् नन्ति महा बाहो

देहे देहिन मव्य यम् ५

तत्र सत्त्वन् निर् मलत् वात् (!!)

प्रका शक मना मयम्

सुख सङ्गेन बध् नाति

ज्ञान सङ्गेन चानघ ६

रजो रागात् मकँव् विद् धि

तृष्णा सङ्ग समुद् भवम्

तन् निबध् नाति कौन्तेय

कर्म सङ् गेन देहिनम् ७

तमस् त्वज्ञान जँव् विद्धि

मोहनं सर्व देहि नाम्

प्र मादालस् य निद् राभिः

तन् निबध् नाति भारत ८

सत् त्वं सुखे सञ् जयति (!!)

रज% कर्म णि भारत

ज्ञान मावृत्य तु तमः(!!)

प्र मादे सञ् जयत् युत ९

रजस् तमश् चाभि भूय (!!)

सत् त्वं भवति भारत

रजस् सत् त्वन् तमश् चैव

तमस् सत् त्वं रजस् तथा १०

सर्वद् वारेषु देहे ऽस्मिन्

प्रकाश उप जायते

ज्ञानँय् यदा तदा विद्यात्

विवृद् धं सत् त्व मित् युत ११

लोभ# प्रवृत् तिरा रम्भः

कर्मणा मशमस् स्पृहा

रजस् येतानि जायन् ते

विवृद् धे भरतर् षभ १२

अप् रका शोऽप्र वृत् तिश्च

प्रमा दो मोह एव च

तमस् येतानि जायन् ते

विवृद् धे कुरु नन् दन १३

यदा सत् त्वे प्रवृद् धे तु

प्रलयँय् याति देह भृत्

तदोत् तम विदाँल् लोकान्

अमलान् प्रति पद्यते १४

रजसिप् रलयङ् गत्वा

कर्म सङ्गिषु जायते

तथा प्र लीनस् तमसि (!!)

मूढ योनिषु जायते १५

कर्मणस् सुकृतस् याहुः

सात् त्विकन् निर् मलम् फलम्

रजसस् तु फलन् दुःखम्

अज्ञानन् तमस# फलम् १६

सत् त्वात् सञ् जायते ज्ञानम्

रजसो लोभ एव च

प्रमाद मोहौ तमसः (!!)

भवतोऽ ज्ञान मेवच १७

ऊर् ध्वङ्गच् छन्ति सत् त्वस् थाः

मध्ये तिष्ठन्ति राजसाः

जघन्य गुण वृत् तिस्थाः

अधो गच् छन्ति तामसाः १८

नान्यङ् गुणेभ्य% कर्तारम् (!!)

यदा द्रष्टा नुपश् यति

गुणेभ्यश् च परँव् वेत्ति

मद् भावं सोऽधि गच् छति १९

गुणा नेता नतीत्यत् रीन्

देही देह समुद् भवान्

जन्म मृत्यु जरा दुःखैः

विमुक् तोऽमृत मश् नुते २०

अ उ

कैर् लिङ्गैस् त्रीन् गुणा नेतान्

अतीतो भवतिप् रभो

किमा चार% कथञ् चैतान्

त्रीन् गुणा नति वर्त ते || २१.

श्री उ

प्र काशञ् चप् रवृत् तिञ् च

मोह मेव च पाण्डव

नद् वेष् टिसम् प्रवृत् तानि

ननि वृत् तानि काङ्क्षति २२

उदा सीन वदा सीनः

गुणैर् यो न वि चाल् यते

गुणा वर्तन् त इत्येव

योऽव तिष् ठति नेङ् गते २३

सम दुःख सुखस् स्वस्थः

सम लोष्टाश् मकाञ् चनः

तुल्यप् रियाप् रियो धीरः

तुल्य निन्दात् म संस् तुतिः २४

मानाप मानयोस् तुल्यः

तुल्यो मित्रा रिपक्ष योः

सर्वा रम्भ परित्या गी

गुणा तीतस् स उच्यते २५

माञ् च यो ऽ व्यभि चारेण

भक्ति योगेन सेवते

स गुणान् सम तीत्यै तान्

ब्रह्म भूयाय कल् पते २६

ब्रह्म णोहिप् रतिष्ठा हम्

अमृतस् याव्य यस्य च

शाश् वतस्य च धर्मस् य

सुखस् यैकान् ति कस्यच २७

ॐ तत् सदिति, श्रीमद् भगवद् गीतासु, उपनि षत्सु,ब्रह्म विद्यायाम्,योग शास्त्रे,श्रीकृष्णार् जुन सँव् वादे, गुणत् रय विभाग योगो नाम, चतुर् दशोऽ ध्याय:

## 15th adhyaya

ॐ श्री परमात् मने नम:

अथ पञ्च दशोऽध्याय:

पुरु षोत्तम योग:

श्रीभ उ

ऊर्ध्व मूल मधश् शाखम्

अश्वत् थम् प्राहु रव्य यम्

छन्दांसि यस्य पर्णानि

यस् तँव् वेद स वेद वित् १

*(s u u I)

अधश् चोर्ध्वम् प्रसृतास् तस्य शाखा:(!!)

गुणप् रवृद् धा विषयप् रवाला:

अधश् चमूलान् यनु सन् ततानि

कर् मानु बन्धीनि मनुष्य लोके २

*(u I I u)

न रूप मस्येह तथोप लभ्यते

नान् तो न चादिर् न च सम् प्रतिष्ठा

अश्वत् थमेनं सुविरूढ मूलम्

असङ्ग शस्त्रेण दृढेन छित् त्वा ३

*(u I u u )

तत# पदन् तत् परि मार्गि तव्यम्

यस् मिन् गता न निवर् तन्ति भूयः ( !!)

तमेव चाद्यम् पुरुषम् प्र पद्ये

यत# प्र वृत् ति# प्रसृता पुराणी ४

*(I I I I )

निर् मान मोहा जित सङ्ग दोषाः

अध् यात्म नित्या विनि वृत्त कामाः

द्वन् द्वैर् विमुक् तास् सुख दुःख सञ् ज्ञैः

गच्छन् त्यमूढा # पदमव् ययन् तत् ५

न तद् भास यते सूर्यः

न शशाङ्को न पावकः

यद् गत्वा न नि वर् तन्ते

तद् धाम परमम् मम ६

ममै वांशो जीव लोके(!!)

जीव भूतस् सना तनः

मनष् षष्ठा नीन् द्रियाणि

प्रकृतिस् थानि कर्षति ७

शरीरँय् यदवाप् नोति

यच् चाप् युत् क्रामतीश् वरः

गृहीत् वैतानि सँय् याति

वायुर् गन्धा निवा शयात् ८

श्रोत्रञ् चक्षुस् स्पर्शनञ् च (!!)

रसनङ् घ्राण मेव च

अधिष् ठाय मनश् चायम्

विषया नुप सेवते ९

उत् क्रामन् तं स्थितँव् वापि

भुञ्जा नँव् वा गुणान् वितम्

विमूढा नानु पश्यन्ति

पश्यन् तिज्ञान चक्षुषः १०

यतन् तो योगिनश् चैनम्

पश्यन् त्यात् मन्य वस् थितम्

यतन् तोऽप्य कृतात् मानः

नैनम् पश्यन् त्यचे तसः ११

यदा दित्य गतन् तेजः

जगद् भास यतेऽखिलम्

यच् चन्द्र मसि यच् चाग्नौ

तत् तेजो विद् धि मामकम् १२

गा माविश्य च भूतानि

धारयाम् यहमो जसा

पुष्णामि चौषधीस् सर्वाः

सोमो भूत्वा रसात् मकः १३

अहँव् वैश्वा नरो भूत्वा

प्राणिनान् देह माश्रितः

प्राणा पान समायुक् तः

पचाम् यन्नञ् चतुर् विधम् १४

*(I I I I )

सर् वस्य चाहं हृदि सन् निविष्टः

मत् तस् स्मृतिर् ज्ञान मपोहनञ् च

वेदैश् च सर् वैर हमेव वेद्यः

वेदान्त कृद् वे दविदे व चाहम् १५

द्वा विमौ पुरुषौ लोके

क्षरश् चाक् षर एवच

क्षरस् सर्वाणि भूतानि

कूटस् स्थोऽक् षर उच्यते १६

उत् तम# पुरुषस् त्वन् यः

परमात् मेत्यु दाहृतः

यो लोकत् रयमा विश्य

बि भर्त्यव् यय ईश् वरः १७

यस्मात् क्षरम तीतोऽहम्

अक्षरा दपि चोत् तमः

अतोऽस् मिलोके वेदे च (!!)

प्रथित# पुरुषोत् तमः १८

यो मामे वम सम् मूढः

जानाति पुरुषोत् तमम्

स सर्व विद् भजति माम् (!!)

सर्व भावेन भारत १९

इति गुह्य तमं शास्त्रम्

इदमुक् तम् मया नघ

एतद् बुद् ध्वा बुद् धिमान् स्यात्

कृत कृत्यश् च भारत २०

ॐ तत् सदिति, श्रीमद् भगवद् गीतासु, उपनि षत्सु,ब्रह्म विद्यायाम्,योग शास्त्रे,श्रीकृष्णार् जुन सँव् वादे, पुरुषोत् तम योगो नाम, पञ्च दशो ऽ ध्यायः

# 16th adhyaya

ॐ श्री परमात् मे ने नमः

अथ षोडशोऽध्यायः

दैवा सुरसम् पद् विभाग योगः

श्री भ उ

अभयं सत् व सं शुद् धिः

ज्ञान योगव् यवस् थितिः

दानन् दमश् च यज्ञश् च

स्वाध्या यस् तप आर् जवम् १

अहिम् सासत् यमक् रोधः

त्यागश् शान् तिर पैशुनम्

दया भूतेष् वलो लुप् त्वम्

मार् दवम् ह्रीर चापलम् २

तेजः (ह) क् षमा धृतिश् शौचम्

अद् रोहो नाति मानिता

भवन् ति सम् पदन् दैवीम्

अभिजा तस् य भारत ३

दम् भो दर् पोऽ भि मानश् च

क्रोध# पारुष् यमेव च

अज्ञानन् चाभि जातस् य

पार् थ सम् पद मासुरीम् ४

दैवी सम्पद् विमोक् षाय

निबन् धाया सुरी मता

मा शुचस् सम् पदन् दैवीम्

अभिजा तोऽ सि पाण् डव ५

द्वौ भूत सर् गौ लोकेऽस्मिन् (!!)

दैव आसुर एव च

दैवो विस् तरश # प्रोक् तः

आसुरम् पार् थ मे शृणु ६

प्रवृत् तिञ् च निवृत् तिञ् च

जना न विदुरा सुराः

न शौ चन् नापि चाचारः

न सत् यन् तेषु विद् यते ७

असत् यमप् रतिष् ठन् ते

जगदा हुर नीश् वरम्

अपरस् पर सम् भूतम्

किमन् यत् काम हैतुकम् ८

एतान् दृष् टिमवष् टभ् य

नष् टात् मानोऽ ल्प बुद् धयः

प्रभ वन् त्युग् रकर् माणः

क्षयाय जगतोऽ हिताः ९

काम माश् रित् य दुष् पूरम्

दम् भमान मदान् विताः

मोहाद् गृहीत् वाऽ सद् ग्राहान्

प्रवर् तन् तेऽ शुचिव् रताः १०

चिन् ताम परिमे याञ् च

प्रलयान् ता मुपाश् रिताः

कामो पभोग परमाः (!!)

एता वदिति निश् चिताः ११

आशा पाशश तैर् बद् धाः

कामक् रोध परा यणाः

ईहन् ते काम भोगार् थम्

अन् याये नार् थ सञ् चयान् १२

इदमद् य मया लब् धम्

इमम् प्राप् स्ये मनो रथम्

इदमस् ती दमपि मे (!!)

भविष् यति पुनर् धनम् १३

असौ मया हतश् शत्रुः

हनिष् ये चा परा नपि

ईश्वरोऽ हम हम् भोगी

सिद् धोऽ हम् बलवान् सुखी १४

आढ् योऽ भिजन वानस् मि

कोऽ न्योऽ स् ति सदृशो मया

यक् ष्ये दास् यामि मोदिष् ये

इत् यज्ञान विमो हिताः १५

अनेक चित्त विभ् रान्ताः

मोह जाल समा वृताः

प्रसक् ता% काम भोगेषु

पतन् ति नरकेऽ शुचौ १६

आत् मसम् भावितास् तब् धाः

धन मान मदान् विताः

यजन् ते नाम यज्ञैस् ते

दम् भेना विधि पूर् वकम् १७

अहङ् कारम् बलन् दर् पम्

कामङ् क्रोधञ् च सं श्रिताः

मामात् मपर देहेषु

प्रद् विषन् तोऽ भ्य सूयकाः १८

तानहन् द्विषत% क्रूरान्

सम् सारेषु नरा धमान्

क्षिपाम् यजस् रम शुभान् (!!)

आसुरीष् वेव योनिषु १९

आसुरीँय् योनि मापन्नाः

मूढा जन् मनि जन् मनि

मामप् राप् यैव कौन् तेय

ततो यान्त्य धमाङ् गतिम् २०

त्रिविधन् नरकस् येदम्

द्वारन् नाशन मात् मनः

काम% क्रोधस् तथा लोभः

तस् मादेतत् त्रयञ् त्यजेत् २१

एतैर् विमुक् त % कौन् तेय

तमोद् वारैस् त्रिभिर् नरः

आचरत् यात् मनश् रेयः

ततो याति पराङ् गतिम् २२

यश् शास् त्र विधि मुत् सृज्य

वर् तते काम कारतः

न स सिद् धिमवाप् नोति

न सुखन् न पराङ् गतिम् २३

तस् माच् छास् त्रम् प्रमाणन् ते

कार् या कार् यव् यवस् थितौ

ज्ञात्वा शास् त्र विधानोक् तम्

कर् मकर् तुमिहार् हसि २४

ॐ तद् सदिति श्री मद् भगवद् गीतासु,उपनि षत्सु, ब्रह्म विद्या याम्, योग शास्त्रे, श्रीकृष्णार्जुन सँव्वादे, दैवा सुरसम् पद् विभाग योगो नाम षोडशोऽध्याय:

## 17th adhyaya

ॐ श्री परमात् मे ने नम:

अथ सप्त दशोऽध्याय:

श्रद् धात्रय विभाग योग:

अ उ

ये शास् त्र विधिमुत् सृज्य

यजन् ते श्रद् धयान् विता:

तेषान् निष् ठातु का कृष्ण

सत् वमाहो रजस् तम: १

श्री उ

त्रिविधा भवति श्रद् धा

देहि नाम् सा स्वभावजा

सात् विकी राजसी चैव

तामसी चेति ताम् शृणु २

सत् वानु रूपा सर् वस्य (!!)

श्रद् धा भवति भारत

श्रद् धा मयोऽ यम् पुरुषः (!!)

यो यच् छ्रद् धस् स एव सः ३

यजन् ते सात् त्विका देवान्

यक् षरक् षां सि राजसाः

प्रेतान् भूत गणांश् चान् ये

यजन् ते तामसा जनाः ४

अशास् त्र विहितङ् घोरम्

तप् यन् ते ये तपो जनाः

दम् भाहङ् कार सँय् युक् ताः

काम राग बलान् विताः ५

कर् शयन् तश् शरीरस् थम्

भूतग् रामम चेतसः

माञ् चैवान् तश् शरीरस् थम्

तान् विद् ध्यासुर निश् चयान् ६

आहारस् त्वपि सर् वस् य

त्रिविधो भवतिप् रियः

यज्ञस् तपस् तथा दानम्

तेषाम् भेद मिमं श‍ृणु ७

आयुस् सत् त्व बलारोग् य -सुखप् रीति विवर् धनाः

रस् यास् स्निग् धास् थिरा हृद् याः

आहारास् सात् त्विकप् रियाः ८

कट् वम् ललवणात् युष् ण-तीक् ष्ण रूक् षवि दाहिनः।

आहारा राजसस् येष्टाः

दुःख शो कामयप् रदाः ९

यात यामङ् गतरसम् (!!)

पूति पर् युषितञ् च यत्

उच् छिष् टमपि चामेध् यम्

भोजनन् तामसप् रियम् १०

अफला काङ् षिभिर् यज्ञः

विधि दृष् टोय इज् यते

यष् टव् यमे वेतिमनः (!!)

समा धाय स सात् त्विकः ११

अभिसन् धाय तु फलम् (!!)

दम् भार् थमपि चैव यत्

इज् यते भरतश् रेष्ठ

तँय् यज्ञम् विद् धि राजसम् १२

विधि हीनम सृष् टान्नम्

मन् त्रहीनम दक् षिणम्

श्रद् धा विरहितँय् यज्ञम्

तामसम् परिचक् षते १३

देवद् विजगुरुप् राज्ञ पूजनम् शौच मार् जवम्

ब्रह्मचर् यमहिम् सा च

शारीरन् तप उच् यते १४

अनुद् वेग करँव् वाक् यम्

सत् यम् प्रिय हितञ् चयत्

स्वाध् यायाभ् यसनञ् चैव

वाङ्मयन् तप उच् यते १५

मन# प्रसादस् सौम् यत् वम्

मौनमात् मविनिग् रहः (!!)

भाव सम् शुद् धि रित् येतत्

तपो मानस मुच् यते १६

श्रद् धया परया तप् तम्

तपस् तत् त्रिविधन् नरैः

अफला काङ् षिभिर् युक् तैः

सात् त्विकम् परिचक् षते १७

सत् कारमान पूजार् थम्

तपो दम् भेन चैव यत्

क्रियते तदिहप् रोक् तम्

राजसञ् चलमध् रुवम् १८

मूढग् राहेणात् मनोयत्

पीडया क्रियते तपः

परस् योत् सादनार् थम् वा

तत् तामस मुदा हृतम् १९

दातव् यमिति यद् दानम्

दीयतेऽ नुपका रिणे

देशे काले च पात्रे च

तद् दानम् सात् त्विकम् स्मृतम् २०

यत् तुप् रत् युपका रार् थम्

फलमुद् दिश्य वा पुनः

दीयते च परिक् लिष् टम्

तद् दानम् राजसम् स्मृतम् २१

अदेश काले यद् दानम् (!!)

अपात्रेभ् यश् च दीयते

असत् कृतम वज्ञातम्

तत् तामस मुदा हृतम् २२

ॐतत् सदिति निर् देशः

ब्रह्मणस् त्रिविधस् स्मृतः

ब्राह्मणास् तेन वेदाश् च

यज्ञाश् च विहिता# पुरा २३

तस् मादोमित् युदाहृत् य

यज्ञ दान तप% क्रियाः

प्रवर् तन्ते विधानोक् ताः

सततम् ब्रह्मवा दिनाम् २४

तदित् यनभिसन् धाय

फलँय् यज्ञ तप% क्रियाः

दानक् रियाश् च विविधाः

क्रियन् ते मोक् षकाङ्क् षिभिः २५

सद् भावे साधु भावे च

सदित् येतत् प्रयुज् यते

प्रशस् ते कर् मणि तथा

सच् छब् द# पार् थ युज् यते २६

यज्ञे तपसि दाने च

स्थितिस् सदिति चोच् यते

कर् म चैव तदर् थीयम्

सदित् येवाभि धीयते २७

अश् रद् धया हुतन् दत् तम्

तपस् तप् तङ् कृतञ् च यत्

असदित् युच् यते पार् थ

न च तत् प्रेत् य नो इह २८

ॐ तत् सदिति श्री मद् भगवद् गीतासु,उपनि षत्सु, ब्रह्म विद्या याम्, योग शास्त्रे, श्रीकृष्णार्जुन सँव्वादे,श्रद् धात्रय विभाग योगो नाम सप्त दशोऽध्याय:

## 18th adhyaya

ॐ श्री परमात् मने नम:

अथ अष्टा दशोऽध्याय:

मोक्ष सन् न्यास योग:

अ उ

सन् न्यासस् य महा बाहो

तत् त्व मिच्छामि वेदितुम्

त्यागस् य च हृषी केश

पृथक् केशि निषू दन १

श्री उ

काम्यानाङ् कर्मणान् न्यासम्

सन् न्यासङ् कवयो विदुः

सर्व कर्म फलत् यागम्

प्राहुस् त्यागँव् विचक् षणाः २

त्याज्यन् दोष वदित् येके

कर्मप् राहुर् मनीषि णः

यज्ञ दान तप% कर्म

नत् याज्य मिति चापरे ३

निश्चयं शृणु मे तत्र

त्यागे भरत सत् तम

त्यागो हि पुरुषव् याघ्र

त्रिविधस् सम् प्रकीर् तितः ४

यज्ञ दान तप% कर्म

नत् याज्यङ् कार्यमे वतत्

यज्ञो दानन् तपश्चैव

पाव नानि मनीषि णाम् ५

एतान्य पितु कर् माणि

सङ्गन् त्यक्त्वा फलानि च

कर् तव्या नीति मे पार्थ

निश् चितम् मत मुत् तमम् ६

नियतस् यतु सन् न्यासः

कर्म णो नोप पद्यते

मोहात् तस्य परित् यागः

तामस# परि कीर्तितः ७

दुःख मित्येव यत् कर्म

कायक् लेश भयात् त्यजेत्

स कृत्वा राजसन् त्यागम्

नैवत् याग फलँल् लभेत् ८

कार्यमित् येव यत् कर्म

नियतङ् क्रियतेऽ र्जुन

सङ्गन् त्यक्त्वा फलञ् चैव

सत्या गस् सात् त्विको मतः ९

नद् वेष्ट्य कुशलङ् कर्म

कुशले नानु षज्जते

त्यागी सत् त्व समा विष्टः

मेधावी छिन् न संशयः १०

नहि देह भृता शक्यम्

त्यक्तुङ् कर्माण् यशे षतः

यस् तु कर्म फलत् यागी

सत् यागीत् यभि धीयते११

अनिष्ट मिष्टम् मिश्रञ् च (!!)

त्रिविधङ् कर्मण# फलम्

भवत् यत्या गिनाम् प्रेत्य

नतु सन् न्यासिनाङ् क्वचित् १२

पञ्चै तानि महा बाहो

कारणा निनि बोध मे

साङ् ख्ये कृतान् ते प्रोक्तानि (!!)

सिद् धये सर्व कर्मणाम् १३

अधिष् ठानन् तथा कर्ता

करणञ् च पृथग् विधम्

विविधाश् चपृथक् चेष्टाः

दैवञ् चैवात्र पञ्चमम् १४

शरीर वाङ् मनो भिर् यत्

कर्मप् रारभ ते नरः

न्याय् यँव् वा विपरी तँव् वा

पञ्चैते तस्य हेतवः १५

तत्रैवं सति कर्तारम्

आत् मानङ् केवलन् तुयः

पश्यत् यकृत बुद् धित्वात्

नस पश्यति दुर्मतिः १६

यस्य नाहङ् कृतो भावः

बुद् धिर् यस्य न लिप्यते

हत् वापि स इमाँल् लोकान्

न हन्ति ननि बध्यते १७

ज्ञानञ् ज्ञेयम् परिज्ञा ता

त्रिविधा कर्म चोदना

करणङ् कर्म कर्तेति

त्रिविध% कर्म सङ्ग्रहः १८

ज्ञानङ् कर्म च कर्ता च

त्रिधैव गुण भेदतः

प्रोच्यते गुण सङ्ख्याने

यथा वच् छृणु तान्यपि १९

सर्व भूतेषु येनैकम्

भाव मव्यय मीक्षते

अवि भक्तँव् विभक्तेषु

तज् ज्ञानवँ् विद् धि सात् त्विकम् २०

पृथक् त्वेन तु यज् ज्ञानम्

नाना भावान् पृथग् विधान्

वेत्ति सर्वेषु भूतेषु

तज् ज्ञानँव् विद् धि राजसम् २१

यत् तु कृत् स्नव देकस् मिन्

कार्ये सक्तम हैतुकम्

अतत् त्वार्थ वदल् पञ्च

तत् तामस मुदा हृतम् २२

नियतं सङ्ग रहितम्

अरागद् वेषत% कृतम्

अफलप् रेप्सुना कर्म

यत् तत् सात् त्विक मुच्यते २३

यत् तु कामेप् सुना कर्म

साहङ् कारेण वा पुनः

क्रियते बहु लायासम्

तद् राजस मुदा हृतम् २४

अनु बन्धङ् क्षयं हिंसाम्

अन वेक्ष्य च पौरुषम्

मोहा दारभ् यते कर्म

यत् तत् तामस मुच्यते २५

मुक्त सङ्गो ऽ नहँव् वादी

धृत् युत् साह समन् वितः

सिद् ध्य सिद् ध्योर् निर् विकारः (!!)

कर्ता सात् त्विक उच्यते २६

रागी कर्म फलप् रेप्सुः

लुब् धो हिंसात्म कोऽशुचिः

हर्ष शोकान् वित% कर्ता

राजस# परि कीर्तितः २७

अयुक् त#प्राकृतस् स्तब् धः

शठो नैष् कृतिकोऽ लसः

विषादी दीर्घ सूत्री च

कर्ता तामस उच्यते २८

बुद् धेर् भेदन् धृतेश् चैव

गुणतस् त्रिविधं शृणु

प्रोच् यमानम शेषेण

पृथक् त्वेन धनञ् जय २९

प्रवृत् तिञ् च नि वृत् तिञ् च

कार्या कार्ये भया भये

बन्धम् मोक्षञ् च या वेत्ति

बुद् धिस् सा पार्थ सात् त्विकी ३०

यया धर्म मधर्मञ् च

कार्यञ् चाकार्य मेव च

अयथा वत् प्रजा नाति

बुद् धिस् सा पार्थ राजसी ३१

अधर्मन् धर्म मिति या (!!)

मन्यते तमसा वृता

सर्वार् थान् विप रीतांश् च

बुद् धिस् सा पार्थ तामसी ३२

धृत्या यया धार यते (!!)

मन# प्राणेन् द्रियक् रियाः

योगेनाव् यभि चारिण् या

धृतिस् सा पार्थ सात् त्विकी ३३

यया तु धर्म कामार्थान्

धृत्या धार यतेऽर् जुन

प्रसङ् गेन फला काङ्क् षी

धृतिस् सा पार्थ राजसी ३४

यया स्वप् नम् भयं शोकम्

विषादम् मद मेव च

नवि मुञ् चन् ति दुर् मेधाः

धृतिस् सा पार्थ तामसी ३५

सुखन् त्विदानीन् त्रिविधम् (!!)

शृणु मे भरतर् षभ

अभ्या साद्र मते यत्र

दुःखान् तञ् चनि गच् छति ३६

यत् तदग्रे विष मिव (!!)

परि णामेऽ मृतो पमम्

तत् सुखं सात् त्विकम् प्रोक्तम्

आत् म बुद् धिप् रसाद जम् ३७

विषयेन् द्रिय सँय् योगात्

यत् तदग्रे ऽमृतो पमम्

परि णामे विष मिव(!!)

तत् सुखं राजसं स्मृतम् ३८

यदग्रे चानु बन्धे च

सुखम् मोहन मात् मनः

निद् रालस्यप् रमादोत् थम्

तत् तामस मुदा हृतम् ३९

न तदस् ति पृथिव् यावँ् वा

दिवि देवेषु वा पुनः

सत् त्वं प्रकृति जैर् मुक्तम्

यदेभिस् स्यात् त्रिभिर् गुणैः ४०

ब्राह्मणक् षत्रिय विशाम् (!!)

शूद्रा णाञ् च परन् तप

कर्माणिप् रवि भक्तानि

स्व भावप् रभवैर् गुणैः ४१

शमो दमस् तपश् शौचम्

क्षान् तिरार् जव मेव च

ज्ञानँव् विज्ञान मास् तिक्यम्

ब्रह्म कर्मस् वभाव जम् ४२

शौर् यन् तेजो धृतिर् दाक्ष् यम्

युद् धे चाप्य पला यनम्

दान मीश् वर भावश् च

क्षात्रङ् कर्मस् वभाव जम् ४३

कृषि गोरक्ष्य वाणिज् यम्

वैश्य कर्मस् वभाव जम्

परि चर्यात् मकङ् कर्म

शूद्रस् यापिस् वभाव जम् ४४

स्वे स्वे कर्मण् यभिरतः (!!)

सं सिद्धिलँ् लभते नरः

स्वकर्म निरतस् सिद् धिम्

यथा विन्दति तच् छृणु ४५

यत# प्रवृत् तिर् भूतानाम्(!!)

येन सर्व मिदन् ततम्

स्व कर्मणा तमभ् यर् च्य

सिद् धिँव् विन्दति मानवः ४६

श्रेयान् स्वधर्मो विगुणः (!!)

पर धर्मात् स्वनुष् ठितात्

स्व भाव नियतङ् कर्म

कुर् वन् नाप् नोति किल् बिषम् ४७

सहजङ् कर्म कौन्तेय

सदोष मपि नत्य जेत्

सर्वा रम्भा हिदोषे ण

धूमे नाग् निरि वावृ ताः ४८

असक्त बुद्धिस् सर्वत्र (!!)

जितात् मा विग तस्पृहः

नैष् कर्म्य सिद्धिम् पर माम् (!!)

सन् न्यासे नाधि गच् छति ४९

सिद् धिम् प्राप् तो यथा ब्रह्म

तथाप् नोति निबोध मे

समासे नैव कौन्तेय

निष्ठा ज्ञानस्य या परा ५०

बुद् ध्या विशुद्ध या युक्तः

धृत् यात् मानन् नियम्य च

शब्दा दीन् विषयांस् त्यक् त्वा

रागद् वेषौ व्युदस्य च ५१

विविक् तसेवी लघ् वाशी (!!)

यत वाक् काय मानसः

ध्यान योग परो नित्यम्

वैराग्यं समु पाश्रितः ५२

अहङ् कारम् बलन् दर्पम्

कामङ् क्रोधम् परिग् रहम्

विमुच्य निर् ममश् शान्तः

ब्रह्म भूयाय कल्पते ५३

ब्रह्म भूत# प्रसन् नात् मा

न शोचति न काङ्क्षति

समस् सर्वेषु भूतेषु

मद् भक्तिँल् लभते पराम् ५४

भक्त्या मामभि जानाति

यावान् यश् चास्मि तत् त्वतः

ततो मान् तत्व तो ज्ञात्वा

विशते तद नन्तरम् ५५

सर्व कर्माण् यपि सदा (!!)

कुर्वाणो मद् व्यपाश्र यः

मत् प्रसा दादवाप् नोति

शाश् वतम् पद मव्ययम् ५६

चेतसा सर्व कर्माणि

मयि सन् न्यस्य मत् परः

बुद् धियो गमुपा श्रित्य

मच् चित्तस् सततम् भव ५७

मच् चित्तस् सर्व दुर् गाणि

मत् प्रसादात् तरिष्य सि

अथ चेत् त्वमहङ् कारात्

नश् रोष्यसि विनङ्क् ष्यसि ५८

यदहङ् कारमा श्रित्य

न योत् स्य इति मन्यसे

मिथ्यैषव् यव सायस् ते

प्रकृतिस् त्वान् नियोक् ष्यति ५९

स्व भाव जेन कौन्तेय

निबद् धस् स्वेन कर्मणा

कर्तुन् नेच् छसि यन् मोहात्

करिष् यस् यव शोऽपि तत् ६०

ईश् वरस् सर्व भूतानाम्

हृद् देशेऽर् जुन तिष्ठति

भ्राम यन् सर्व भूतानि

यन् त्रा रूढानि मायया ६१

तमेव शरणङ् गच्छ

सर्व भावेन भारत

तत् प्रसादात् परां शान्तिम्

स्थानम् प्राप् स्यसि शाश्वतम् ६२

इति ते ज्ञान माख्यातम्

गुह् याद् गुह्य तरम् मया

विमृश् यैतद शेषेण

यथेच् छसि तथा कुरु ६३

सर्व गुह्य तमम् भूयः

शृणु मे परमँव् वचः

इष्टोऽसि मे दृढ मिति (!!)

ततो वक्ष्यामि ते हितम् ६४

मन् मना भव मद् भक्तः

मद् याजी मान् नमस् कुरु

मामे वैष्यसि सत्यन् ते

प्रति जाने प्रियोऽ सि मे ६५

सर्व धर्मान् परित् यज्य

मामेकं शरणँव् व्रज

अहन् त्वा सर्व पापेभ्यः

मोक्ष यिष्यामि मा शुचः ६६

इदन् ते नातपस् काय

ना भक्ताय कदा चन

न चाशुश् रूषवे वाच्यम्

नच माँय् योऽभ् यसू यति ६७

य इमम् परमङ् गुह्यम्

मद् भक्तेष् वभि धास्यति

भक्तिम् मयि पराङ् कृत्वा

मामे वैष्यत् यसं शयः ६८

न च तस्मान् मनुष् येषु

कश्चिन् मे प्रिय कृत् तमः

भविता नच मे तस्मात्

अन्य# प्रिय तरो भुवि ६९

अध्येष् यते च य इमम् (!!)

धर्म्यं सँव् वाद माव योः

ज्ञान यज्ञेन तेनाहम्

इष्टस् स्यामिति मे मतिः ७०

श्रद् धावा नन सूयश् च

शृणु यादपि यो नरः

सोऽपि मुक्तश् शुभाल्ँ लोकान्

प्राप् नुयात् पुण्य कर्म णाम् ७१

कच्चि देतच्छ् रुतम् पार्थ

त्व यैकाग् रेण चेतसा

कच् चिदज्ञा न सम्मो हः

प्रनष् टस् ते धनञ् जय ७२

अ उ

नष्टो मोहस् स्मृतिर् लब्धा

त्वत् प्रसा दान् मयाच् युत

स्थितोऽस्मि गत सन्देहः

करिष् ये वचनन् तव ७३

स उ

इत्यहँव् वासु देवस्य

पार्थस् यच महात् मनः

सँव् वाद मिम मश्रौषम्

अद् भुतं रोम हर्षणम् ७४

व्यासप् रसादाच्छ् रुत वान् (!!)

एतद् गुह्य महम् परम्

योगँय् योगेश् वरात् कृष्णात्

साक्षात् कथयतस् स्वयम् ७५

राजन् संस्मृत्य संस् मृत्य

सँव् वाद मिम मद् भुतम्

केश वार्जुन यो# पुण्यम्

हृष्या मिच मुहुर् मुहुः ७६

तच् च संस् मृत्य संस् मृत्य

रूप मत् यद् भुतं हरेः

विस्मयो मे महान् राजन्

हृष्यामि च पुन#पुनः ७७

यत्र योगेश् वर% कृष्णः

यत्र पार्थो धनुर् धरः

तत्रश् रीर् विजयो भूतिः

ध्रुवा नीतिर् मतिर् मम ७८

ॐ तत् सदिति, श्रीमद् भगवद् गीतासु, उपनि षत्सु,ब्रह्म विद्यायाम्,योग शास्त्रे,श्रीकृष्णार् जुन सँव् वादे, मोक्ष सन् न्यास योगो नाम, अष्टा दशो ऽ ध्यायः

श्रीकृष्णार्पणमस्तु

श्रीकृष्णार्पणमस्तु

श्रीकृष्णार्पणमस्तु

❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁ ❁

# ABOUT THE AUTHOR

Sudarshan Ravi, (Sudarshan R) is a Samskrta and Veda scholar, educator and researcher. He wears many hats in the sphere of Samskrta and Indic culture-propagation, as a teacher, content creator on YouTube, blogger and volunteer at Samskrita Bharati, conducting workshops to promulgate the cause. A post graduate from IISc and a faculty for Aptitude and critical

thinking, he seeks to apply his efforts in reaching out to as many as possible in his quest to raise awareness of the salient features of Sanatana Dharma.

# BIBLIOGRAPHY

- Shreemad Bhagavad Gita, shlokaartha sahita, Gita press, Gorakhpur [https://gitapress.org/downloadable/ebooks](https://gitapress.org/downloadable/ebooks)

- Ashtadhyayi Dhaatu paatha [https://ashtadhyayi.com/](https://ashtadhyayi.com/)

- Samskrta Nandini[https://www.youtube.com/@samskrtanandini2679](https://www.youtube.com/@samskrtanandini2679)

- Chandojnanam [https://sanskrit.iitk.ac.in/](https://sanskrit.iitk.ac.in/)

**Om Tat Sat**

**Who should buy this book?**

1. Beginners of Devanagari script

2. Sanskrit learners

3. Hindi speaking audience

4. Children enthusiastic about BG memorization

5. Gita learners

6. Gita advanced learners who already know Gita but want to refine and polish it in a Vedic style with proper intonations

7. Any shloka-learner can apply this method of splitting words to other texts

Page | 2

2 | Page